# षष्ठोऽध्यायः

# समीक्षा निष्कर्षः

“वैदिकसंहितायां लोकतन्त्रस्यावधारणा : एकमध्ययनम्” इति विषयमधिकृत्य सम्पादितस्य शोधकार्यस्य परिसमाप्त्यवसरे प्राप्तानां विविधानामवधारणानां समीक्षाप्रतिपादनमेव अस्याध्यायस्य वर्ण्य: विषय:। सम्प्रति विश्वमानवसभ्यताया: आदिग्रन्थरूपेण वेदा: एव प्रख्याता: विद्यन्ते। वेदस्तु ज्ञानदायको शास्त्रविशेष:। सर्वेषां विषयाणांतत्वानां वा गूढज्ञानं तु वेदादिशास्त्रेष्वेव निहितोविद्यते। अस्माकमालोचनीय-राजनैतिकतत्वस्य लोकतन्त्रसंज्ञकस्य शासनप्रकारस्यापि मूलतत्वं वेदेष्वेवोपलब्धम्।

वस्तुत: वैदिकसंहिता: विविधदेवतामुद्दिश्यलिखितानां पद्य-गद्यानां समाहार: वर्तन्ते। तत्र साक्षात्कस्यापि शास्त्रस्य सम्पूर्णवर्णनं तु नैवोपलभ्यते किन्तु तेषु स्तुतिपरकेषु संहितामन्त्रेषु प्राप्तानां शब्दानांमन्त्रांशानां च विश्लेषणेन सायणभाष्यस्याध्ययनेन च तेषां शास्त्राणां गूढतत्वानां विविधसिद्धान्तानां चावस्थिति: तु प्रमाणीयन्ते एव।

वैदिकसंहितानामध्ययनेन तत्कालीनसमाजस्य राजनैतिकपरिस्थितेर्ज्ञानं जायते। लोकतान्त्रिकशब्दानां नीतिनां सिद्धान्तानां च अधिकाधिकप्रमाणानि संहितासु उपलभ्यन्ते। राष्ट्रस्थनागरिका: राजनैतिकशक्ते: उत्सस्वरूपा इति सिद्धान्तं तु संहितायां बहुश: परिलक्ष्यन्ते। तात्कालिकराजनीत्यां लोकतन्त्रं ख्यातमासीत्। तत्र Democracy इत्यनेन जनान् तन्त्रं, जनात् तन्त्रं, जनस्य तन्त्रमितिनिर्वचनेन राजनैतिकाधिकारप्रदानेन जनै: सञ्चालितशासनप्रकाररूपं व्याख्यातम्। वैदिकमन्त्रे जनतान्त्रिकशासनस्यावस्थिति: जानराज्यमिति शासनप्रकारे स्वराज्यमिति शासनप्रकारे च प्रत्यक्षरूपेण परिलक्ष्यते। जनताया: हितार्थं यद्राज्यं तत् जानराज्यमिति व्याख्यया लिङ्कनस्य परिभाषावत् सप्तष्वेव विभक्तिषु जानराज्यस्य व्याख्या शोधकार्येऽस्मिन् उपस्थापिता। इतोऽपि जनतन्त्रस्य समार्थकशब्दरूपेण लोकतन्त्र-प्रजातन्त्र-गणतन्त्र-प्रभृतिपदानां कोषाणां वैदिकमन्त्राणां चानुसरणपूर्वकं जनतन्त्रात्मकं व्याख्यानं प्रस्तुतम्। अत: निष्कर्षरूपेण वक्तुं शक्यते यत् वैदिकमन्त्रे Democracy इति पदस्य साक्षादवस्थितेरभाव: परिलक्षिते सत्यपि तद्भावगत-गणतन्त्र-

लोकतन्त्र-जनतन्त्रादिपदानां व्याख्यां प्रस्तूय लोकतान्त्रिकप्रशासनस्य बीजं संहितासूपलब्धमिति प्रमाणयितुं शक्यते।

वैदिकस्थानीयप्रशासनस्यालोचनायामस्माभि: 'ग्रामणी' इत्यस्य निर्वाचनस्य वर्णनमुपस्थापितम्। तत्र "ग्रामजितो यथा नर:" (ऋ.सं.५.५४.८) इत्युक्त्वा ग्रामवासीनां हृदयजयकर्तुं सामर्थ्यवन्तं व्यक्तिविशेषं 'ग्रामणी' इति प्रोक्तम्। किन्तु अन्यत्र कुत्रचित् राज्ञा तस्य नियुक्तेर्वर्णनमुपलब्धम् -"सम्राडेव अधिकृतान् विनियुक्ते, एतान् ग्रामान् एतान् ग्रामान् अधितिष्ठस्वेति" (प्रश्नो.३.४)।वस्तुत: अत्र ग्रामणीनियुक्तेर्विषये वैविध्यतां परिदृश्यते। किन्तु ग्रामिणानां जनानां सम्मतिप्रदानादनन्तरं राज्ञा आनुष्ठानिकरूपेण अधिकारप्रदानस्य व्यवस्थासीदिति प्रतिभाति।

वैदिकलोकतान्त्रिकप्रशासने ग्रामशासनव्यवस्थाया: विकाशात् ग्रामपर्यायत: शासनं विकेन्द्रीकर्तुंप्रयाशो विहित:। तद्वदाधुनिकलोकतन्त्रेपि स्थानीयप्रशासनस्य (पञ्चायत-पौरसभादीनां वा) भूमिका अस्माभि: गोचरीक्रियते। प्रान्तीयपर्यायस्य केन्द्रियपर्यायस्य च शासकचयनावसरे 'ग्रामणी' इत्यस्य या विशेषराजनैतिकक्षमता परिलक्ष्यते तद्वत् आधुनिकलोकतन्त्रेपि विधायकानां सांसदानाञ्च निर्वाचनसमये स्थानीयराजनैतिकमतावलम्बीनां भूमिका गुरुत्वपूर्णा भवति। जनमतसंघटने राजनैतिकाभिमतानां प्रचारकार्ये च तेषामावश्यकता सर्वैरेव स्वीक्रियते।

वैदिकलोकतान्त्रिकप्रशासने 'लोकतन्त्रम्' इति पदस्य साक्षात् प्रयोगं नैवोपलभ्यते, किन्तु गणतान्त्रिकादर्शेन परिपूरणस्य जानराज्यसंज्ञकस्य शासनप्रकारस्योल्लेखं तु समुपलभ्यते। "सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्याय" इति शुक्लयजुर्वेदस्य मन्त्रस्य व्याख्यायां भाष्यकारेण उवटेन "सुवध्वमिति प्रत्येकं सम्बन्ध:" इत्यनेन वाक्यांशेन सर्वेषां जनसाधारणानां समन्वयस्वरूपं शासनव्यवस्थां जानराज्यमिति उक्तम्। पुनश्च "जनानां

राज्याय" (श.ब्रा.५.३.३.१२) जानराज्याय इत्यर्थं प्रकटीकरोति ब्राह्मणवाक्यम्। संहिताषु अस्य जानराज्यस्यावस्थिति:, जनराट् इत्यस्य निर्वाचनं, नियोग:, कार्यकालनिर्णय:, विविधानामधिकाराणामुल्लेखश्च गूढरूपेण विद्यन्ते।

दाशराज्ञयुद्धे(ऋ.सं.१.५३.९; ७.१८.१४) जानराज्यानां विलुप्तेराख्यानं संहिताषूपलब्धम्। तत्र 'सुश्रवस्' 'सुदास'-प्रभृतिभि: सम्राड्भि: सह शताधिकजनराजां मध्ये युद्धस्य वर्णनं समुपलभ्यते। तत्र जनराजांषष्ठषष्ठीसहस्रसंख्यकानां (६६०००) सैन्यानामात्मवलिदानस्य गाथापि संहिताषु प्राप्यते। अनेन प्रतितिर्जायते यत् शासनकार्यव्यवस्थिते सत्यपि सामरिकक्षेत्रे जानराज्यानां दौर्बल्यता आसीत्।

वैदिकलोकतान्त्रिकप्रशासनव्यवस्थाया: व्याख्यानावसरे विविधानां शासनप्रकारकाणामवस्थानं परिलक्षितम्। तासु व्यवस्थाषु साम्राज्य-भौज्य-आधिपत्यादिविविधेषु शासनप्रकारेषु लोकतान्त्रिकादर्शं आंशिकरूपेणैव संप्राप्यते। तत् बृहत्-भौगोलिकसीमान्तर्गतेषु प्रदेशेषु विविधविभागे (स्थानीय-प्रान्तीयस्तरे वा) कस्मिन् विभागे किदृशी पद्धती प्रचलितासीत् तत् वक्तुं नैव शक्यते। किन्तु स्थानीयप्रशासने (पञ्चायतस्तरे) सदैव लोकतान्त्रिकपद्धतेरवस्थानम् एव परिलक्षितम्।वैदिकप्रशासने जननायक: प्रायश: स्वस्य क्षमतां (राजनैतिकक्षमताम्) विकेन्द्रीकरणनीतिना विभज्यते स्म। स्वस्य क्षमतां शक्तिं वा अन्येषु सुयोग्यजनेषु वितरणस्य दृष्टान्तं लोकतन्त्रस्यैव निदर्शनमिति वक्तुं शक्यते।

लोकतान्त्रिकप्रशासनस्य विविधप्रकारकाणां शासनव्यवस्थानामुपस्थिति: वैदिकलोकतन्त्रे प्रत्यक्षीक्रियते। तत्र प्रत्यक्षपरोक्षरूपयो: मतदानपद्धत्योरपि अवस्थिति: प्रत्यक्षीक्रियते। ग्रामण्यनियुक्तिविषये प्रत्यक्षपद्धत्या: मतदानव्यवस्था, स्वराट्-जनराट्-इत्यनयो: वरणसमये परोक्षपद्धत्या: मतदानव्यवस्थाश्च विकशितासीत्। तत्कालिनशासननीत्यां विविधक्षेत्रे सुयोग्यपुरूषाणां नियोजनं, नीतिनिर्धारणे सहयोगग्रहणं च परिलक्ष्य वैदिककाले

संसदीयव्यवस्थाया: अवस्थिति: अनुमातुं शक्यते। कुत्रचित् शासकजनं 'राष्ट्रपति' इति पदेनाभिहितं, कतिपयनीतिनां निर्धारणे तस्य प्राधान्यताञ्च परिलक्ष्य राष्ट्रपतीयप्रशासनस्यापि अवस्थिति: आसीदिति वक्तुं शक्यते। पुनश्च वर्तमानलोकतन्त्रपद्धत्यांयासां विविधप्रकारकाणां शासनव्यवस्थानां विकाश: जात: तासां सर्वाषामेव आदर्शानामवधारणानां चावस्थिति: वैदिकलोकतान्त्रिकप्रशासने विद्यमानासीदिति प्रमाणितम्।

वैदिकलोकतान्त्रिकपद्धत्यां न केवलमाधुनिकलोकतान्त्रिकशासनप्रकारकाणामेवावस्थिति: अपि तु स्वराज्य – जानराज्यवत् 'वैराज्य' इति विधाया: व्यवस्थाया: उपस्थितिरपि दृग्गोचरी भवति। गवेषकै: वैराज्यव्यवस्था शासकरहिता स्वनियन्त्रितलोकतान्त्रिकी व्यवस्था इति प्रोक्ता। कालक्रमेणैषा पद्धति विलुप्ता जाता। तदनन्तरं राजतन्त्र-स्वराज्य-जानराज्य-साम्राज्यादिनां च सृजनम्। संहितायामपि जानराज्यव्यवस्थायारनन्तरं लोकतान्त्रिकसाम्राज्यस्य लोकतान्त्रिकराजतन्त्रस्य च विकाशं वर्णितम्। अत: राजतन्त्रे शासकस्य स्वेच्छाचारिताया: वृद्धिभूते सति लोककल्याणार्थं लोकतन्त्रस्य प्रदुर्भावमिति राजनैतिकसिद्धान्तस्य अशुद्धता अनेन प्रमाणिता।

पाश्चात्यजगति अस्या: लोकतन्त्रमितिशासनविधाया: उत्पत्ति: ख्रीष्टपूर्वपञ्चमशतिकायामिति अद्यावधि समुपलब्धं तथ्यम्। किन्तु अस्यादर्शस्यावस्थिति: वेदादिशास्त्रे समुपलब्धत्वात् प्राच्यदेशे सृष्टे: प्रारम्भकालादेव अस्योपस्थिति: प्रमाणिता। अस्यां प्राच्यराजनीत्यां शासनकार्ये कर्तव्यपालनं प्रजासंरक्षणञ्च प्रमुखत्वेन भजते। वेदादिशास्त्रादारभ्य लौकिकसाहित्यपर्यन्तं कर्मयोगस्य निरविच्छिन्नवर्णनमेव अस्य कर्तव्यबोधस्य निदर्शनम्। अत: राजशास्त्रं'राजधर्म' इत्यनेनाभिहितम्।

स्वराट्-जनराट्-सम्राट्-प्रभृतिनां वरणावसरे राजसूयादियज्ञं सम्पाद्यते स्म। तद्राजसूययज्ञे 'रत्नहवि' इति संज्ञकानुष्ठाने रत्नीसु महिषी-वावातादिनारीणामपि स्थानमासीत्। इतोऽपि

“मानुषी विश:”(ऋ.सं.१०.८०.६) इत्यनेन मन्त्रांशेन तात्कालिनराष्ट्रस्य नागरिकरूपेण नारीणां स्वीकरणं वर्णितम्। अत:वैदिकलोकतान्त्रिकशासने शासकचयनावसरे नारीणामपि मतदानस्याधिकार: आसीदिति प्रमाणितम्। किन्तु पाश्चात्यराजनैतिकजगति उनविंशशताब्दे नारीभ्य: मतदानस्याधिकार: प्रदत्त:। अनेन ह्यस्माकिनी लोकतान्त्रिकी व्यवस्था प्राचीनतमा नारीपुरूषाणां सममर्यदया समृद्धा चेति प्रमाणिता।

प्राच्यपाश्चात्योभयदेशे विकशितेषु राजनैतिकविचारेष्वपि वैविध्यता परिलक्षते। तत्र उभयत्र विकशितायां साम्राज्यव्यवस्थायां यत् पार्थक्यं दृश्यते तदुल्लेखनीयं वर्तते। पाश्चात्यसाम्राज्यशासने कुत्रचित् शासकानां कठोरशासन-प्रजापीडन-स्वसाम्राज्यवर्द्धनादिकारणात् शासितानां शासकोपरि विरूपभाव: प्राय: परिलक्षते स्म। ते शासका: न कदापि जनप्रिया: आसन्। परन्तु प्राच्यजगति साम्राज्यमपि लोकतन्त्रवत् सुखकरमासीत्। यत: इह वाजपेयेन यज्ञेन सम्राडिति पदवी प्राप्यते स्म। वस्तुत: न च जन-धन-विनाशपूर्वक: कोऽपि सम्राट् भवेदपितु यज्ञरूपसुकर्मणा शासक: सम्राट् भवति स्म। न च कस्यापि अधर्मपन्थया निधनमिह दृश्यते। अत: वैदिकलोकतन्त्रं पाश्चात्यलोकतन्त्रस्य तुलनायाम् उत्कृष्टतरमिति प्रमाणसिद्धम्। वैदिकलोकतान्त्रिकराष्ट्रेषु युद्ध-विग्रहादीनाम् अवस्थिति: नासीदित्यपि न। किन्तु आणविकादिमारणास्त्राणामभावत्वात् जनहानि: न्यूना आसीत्। युद्धेष्वपि हिंसा-द्वेष-छल-कपटादिवैरीभावानाया: विपरीते धर्मयुद्धानां प्रवर्तनं तदानीं परिलक्ष्यते। अत: तात्कालीनराजनीत्या: युद्धसिद्धान्तम् आधुनिकराष्ट्रै: अनुकरणीयम्।

शिक्षाव्यवस्थायामपि अधुना यथा बह्वायामी शिक्षा प्रवर्त्तिता, शिक्षादानग्रहणसौलभ्यता परिवर्द्धिता, शिक्षितानां संख्यापि वृद्धिं गता: परन्तु वैदिकशिक्षाया: अभावात् नैतिकशिक्षा ह्रासं गता। येन नैतिकता प्राय: क्षीणा इव प्रतिभाति। अत: आधुनिकशिक्षाव्यवस्थायां पाठ्यक्रमे किञ्चित् वैदिक-नैतिकशिक्षानां अवस्थानम् अपरिहार्यं मन्यते।

अस्य शोधकार्येण प्रमाणितं यत् तात्कालिनबृहत्तरभारतवर्षे लोकतान्त्रिकशासनस्यावस्थिति: अनादिकालादेव प्रचलिता। तद्वैदिकलोकतान्त्रिकप्रशासनं साक्षात् आधुनिकलोकतन्त्रवत् नैवोपलभ्यते। किन्तु स्वाधीनता-समता-राष्ट्र-नगरिकत्व-मतदानव्यवस्था-शासनकालनिर्णय-संविधानव्यवस्था-विकाशनीति-वैदेशिकनीति-प्रभृतीनाम् अनेकानेकानां लोकतान्त्रिकावधारणानामवस्थानं तु प्राप्यते हि। अत: आधुनिक-राजनीतिशास्त्रविद्भि: लोकतन्त्रस्य विकाशस्य प्रगतेर्वा शौर्यं पाश्चात्यदेशं प्रति समर्पणम्, पुनश्च वृटिशयुगानन्तरं भारतवर्षे लोकतन्त्रस्य शुभारम्भस्य यत् वृत्तान्तमुपस्थापितं तत्तु अशुद्धं निरर्थकं चेति प्रमाणितम्।

पाश्चात्यजगतिविकशितं Democracy इत्यत: तथा वर्तमानकाले भारतवर्षे प्रचलितलोकतन्त्रतोऽपि उत्कृष्टतरं वैदिकस्वराज्यमिति सदृष्टान्तमुल्लेखं कर्तुं शक्यते। स्वराज्यव्यवस्थाया: उच्चतमादर्शै: अनुप्राणितेन राष्ट्रपितृमहात्मागान्धीवर्येणापि स्वस्यान्दोलनस्य नाम 'स्वराज' इति शब्देनाभिहितम्। वैदिकलोकतन्त्रस्य विश्वशान्तेर्भावना, विश्वबन्धुत्वं, राष्ट्रं देवतात्वेन स्वीकरणं, सर्वेषां सामग्रिकविकाशस्य चिन्तनं, पुत्रवत्प्रजापालनं चेत्यादिनीतिनामनुकरणं क्रियते चेत् लोकतान्त्रिकप्रशासनं सर्वोत्कृष्टं परिमार्जितं सर्वहितकरञ्च भवितुं शक्नोति। अत: वैदिकलोकतन्त्रस्य युगानुकुलानुकरणं नितान्तमावश्यकमिति मन्ये।